अथवंशानुकीर्तनं

वैशम्पायन उवाच

शरतल्पगतं भीष्म पाण्डवोऽथ कुरूद्वहः ।
युधिष्ठिरो हितं प्रेप्सु-रपृच्छत् कल्मषापहम् ॥१॥

युधिष्ठर उवाच

किं श्रेयः पुरुषस्येह किं कुर्वन् सुखमेधते ।
विपाप्मा स भवेत् केन किं वा कल्मषनाशनम् ॥२॥

वैशम्पाय उवाच

तस्मै शुश्रुषमाणाय भूयः शान्तनवस्तदा ।
दैवं वंशं यथान्याय-माचष्ठ पुरुषर्षभ ॥३॥

भीष्म उवाच

अयं दैवतवंशो वै ऋषिवंशसमन्वितः ।
त्रिसंध्यं पठितः पुत्र कल्मषापहरः परः ॥४॥
यदन्हा कुरुते पाप-मिन्द्रियैः पुरुषश्चरन् ।
बुद्धिपूर्वमबुद्धिर्वा रात्रौ यच्चापि संध्ययोः ॥५॥
मुच्यते सर्वपापेभ्यः कीर्तयन् वै शुचिः सदा ।
नान्धोन बधिरः काले कुरुते स्वस्तिमान् सदा ॥६॥
तिर्यग्योनि न गच्छेच्च नरकं संकराणि च ।
न च दुःखभयं तस्य मरणे स न मुह्यति ॥७॥
देवासुरगुरुर्देवः सर्वभूतनमस्कृतः ।
अचिन्त्योऽथाप्यनिर्देश्यः सर्वप्राणो ह्ययोनिजः ॥८॥
पितामहो जगन्नाथः सावित्री ब्रह्मणः सती ।
वेदभूरथ कर्ता च विष्णुर्नारायणः प्रभुः ॥९॥
उमापतिर्विरूपाक्षः स्कन्दः सेनापतिस्तथा ।
विशाखो हुतभुग् वायु-श्चन्द्रसूर्यौ प्रभाकरौ ॥१०॥
शक्रः शचीपतिर्देवो यमो धूमोर्णया सह ।
वरुणः सह गौर्या च सह ऋद्धया धनेश्वरः ॥११॥
सौम्या गौः सुरभिर्देवी विश्रवाश्च महानृषिः ।
संकल्पः सागरो गङ्गा स्रवन्त्योऽथ मरुद्गणः ॥१२॥
वालखिल्यास्तपःसिद्धाः कृष्णद्वैपायनस्तथा ।
नारदः पर्वतश्चैव विश्वावसुर्हहाहूहूः ॥१३॥
तुम्बुरुश्चित्रसेनश्च देवदूतश्च विश्रुतः ।
देवकन्या महाभागा दिव्याश्चाप्सरसां गणाः ॥१४॥
उर्वशी मेनका रम्भा मिश्रकेशी ह्यलम्बुषा ।
विश्वाची च धृताची च पञ्चचूडा तिलोत्तमा ॥१५॥
आदित्या वसवो रुद्राः साश्विनः पितरोऽपि च ।
धर्मः श्रुतं तपो दीक्षा व्यवसायः पितामहः ॥१६॥
शर्वर्यो दिवसाश्चैव मारीचः कश्यपस्तथा ।
शुक्रो बृहस्पतिर्भौमो बुधो राहुः शनैश्चरः ॥१७॥
नक्षत्राण्यतवश्चैव मासाः पक्षाः सवत्सराः ।
वैनतेयाः समुद्राश्च कद्रुजाः पन्नगास्तथा ॥१८॥
शतद्रुश्च विपाशा च चन्द्रभागा सरस्वती ।
सिंधुश्च देविका चैव प्रभासं पुष्कराणिच ॥१९॥
गङ्गा महानदी वेणा कावेरी नर्मदा तथा ।
कुलम्पुना विशल्या च करतोयाम्बुवाहिनी ॥२०॥
सरयूर्गण्डकी चैव लोहितश्च महानदः ।
ताम्रारुणा वेत्रवती पर्णाशा गौतमी तथा ॥२१॥
गोदावरी च वेण्या च कृष्णवेणा तथाद्रिजा ।
दृषद्वती च कावेरी चक्षुर्मन्दाकिनी तथा ॥२२॥
प्रयागं च प्रभासं च पुण्यं नैमिषमेव च ।
तच्च विश्वेश्वरस्थानं यत्र तद्विमलं सरः ॥२३॥
पुण्यतीर्थं सुसलिलं कुरुक्षेत्रं प्रकीर्तितम् ।
सिंधूत्तमं तपोदानं जम्बूमार्गमथापि च ॥२४॥
हिरण्वती वितस्ता च तथा प्लक्षवती नदी ।
वेदस्मृतिर्वेदवती मालवाथाश्ववत्यपि ॥२५॥
भूमिभागास्तथा पुण्या गङ्गाद्वारमथापि च ।
ऋषिकुल्यास्तथा मेध्या नद्यः सिंधुवहास्तथा ॥२६॥
चर्मण्वती नदी पुण्या कौशिकी यमुना तथा ।
नदी भीमरथी चैव बाहुदा च महानदी ॥२७॥
माहेन्द्रवाणी त्रिदिवा नीलिका च सरस्वती ।
नन्दा चापरनन्दा च तथा तीर्थमहाह्रदः ॥२८॥
गयाथ फल्गुतीर्थं च धर्मारण्यं सुरैर्वृतम् ।
तथा देवनदी पुण्या सरश्च ब्रह्मनिर्मितम् ॥२९॥
पुण्यं त्रिलोकविख्यातं सर्वपापहरं शिवम् ।
हिमवान् पर्वतश्चैव दिव्यौषधिसमन्वितः ॥३०॥
विन्ध्यो धातुविचित्राङ्ग-स्तीर्थवानौषधान्वितः ।
मेरुर्महेन्द्रो मलयः श्वेतश्च रजतावृतः ॥३१॥
शृङ्गवान् मन्दरो नीलो निषधो दर्दुरस्तथा ।
चित्रकूटोऽजनाभश्च पर्वतो गन्धमादनः ॥३२॥
पुण्यः सोमगिरिश्चैव तथैवान्ये महीधराः ।
दिशश्च विदिशश्चैव क्षितिः सर्वे महीरुहाः ॥३३॥
विश्वेदेवा नभश्चैव नक्षत्राणि ग्रहास्तथा ।
पान्तु नः सततं देवाः कीर्तिताऽकीर्तिता मया ॥३४॥
कीर्तयानो नरो ह्येतान् मुच्यते सर्वकिल्बिषैः ।
स्तुवंश्च प्रतिनन्दंश्च मुच्यते सर्वतो भयात् ॥३५॥
सर्वसंकरपापेभ्यो देवतास्तवनन्दकः ।
देवतानन्तरं विप्रास्तपः सिद्धांस्तपोऽधिकान् ॥३६॥
कीर्तितान् कीर्तयिष्यामि सर्वपापप्रमोचनान् ।
यवक्रीतोऽथ रैभ्यश्च कक्षीवानौशिजस्तथा ॥३७
भृग्वङ्गिरास्तथा कण्वो मेधातिथिरथ प्रभुः ॥
बर्ही च गुणसम्पन्नः प्राचीं दिशमुपाश्रिताः ॥३८॥
भद्रां दिशं महाभागा उल्मुचुः प्रमुचुस्तथा ।
मुमुचुश्च महाभागः स्वस्त्यात्रे यश्च वीर्यवान् ॥३९॥
मित्रावरुणयोः पुत्रस्तथागस्त्यः प्रतापवान् ।
दृढायुश्चोर्ध्वबाहुश्च विश्रुतावृषिसत्तमौ ॥४०॥
पश्चिमां दिशमाश्रित्य य एधन्ते निवोध तान् ।
उषङ्गुः सह सोदर्यैः परिव्याधश्च वीर्यवान् ॥४१॥
ऋषिर्दीर्घतमाश्चैव गौतमः काश्यपस्तथा ।
एकतश्च द्वितश्चैव त्रितश्चैव महानृषिः ॥४२॥
अत्रेः पुत्रश्च धर्मात्मा तथा सारस्वतः प्रभुः ।
उत्तरां दिशमाश्रित्य य एधन्ते निबोध तान् ॥४३॥
अत्रिर्वरिष्ठः शक्तिश्च पाराशर्यश्च वीर्यवान् ।
विश्वामित्रो भरद्वाजो जमदग्निस्तथैव च ॥४४॥
ऋचीकपुत्रो रामश्च ऋषिरौद्दालकिस्तथा ।

श्वेतकेतुः कोहलश्च विपुलो देवलस्तथा ॥४५॥
देवशर्मा च धौम्यश्च हस्तिकाश्यप एव च ।
लोमशो नाचिकेतश्च लोमहर्षण एव च ॥४६॥
ऋषिरुग्रश्रवाश्चैव भार्गवश्च्यवनस्तथा ।
एष वै समवायश्च ऋषिदेवसमन्वितः ॥४७॥
आद्यः प्रकीर्तितो राजन् सर्वपापप्रमोचनः ।
नृगो ययातिर्नहुषो यदुः पूरुश्च वीर्यवान् ॥४८॥
धुन्धुमारो दिलीपश्च सगरश्च प्रताप वान् ।
कृशाश्वो यौवनाश्वश्च चित्राश्वः सत्यवांस्तथा ॥४९॥
दुष्यन्तो भरतश्चैव चक्रवर्ती महायशाः ।
पवनो जनकश्चैव तथा दृष्टरथो नृपः ॥५०॥
रघुर्नरवरश्चैव तथा दशरथो नृपः ।
रामो राक्षसहा वीरः शशबिंदुर्भगीरथः ॥५१॥
हरिश्चन्द्रो मरुत्तश्च तथा दृढरथो नृपः ।
महोदर्यो ह्यलर्कश्च ऐलश्चैव नराधिपः ॥५२॥
करन्धमो नरश्रेष्ठः कध्मोरश्च नराधिपः ।
दक्षोऽम्बरीषः कुकुरो रैवतश्च महायशाः ॥५३॥
कुरुः संवरणश्चैव मान्धाता सत्यविक्रमः ।
मुचुकुन्दश्च राजर्षिर्जन्हुर्जान्हविसेवितः ॥५४॥
आदिराजः पृथुर्वैन्यो मित्रभानुः प्रियङ्करः ।
त्रसद्दस्युस्तथा राजा श्वेतो राजर्षिसत्तमः ॥५५॥
महाभिषश्च विख्यातो निमिराजा तथाष्टकः ।
आयुः क्षुपश्च राजर्षिः कक्षेयुश्च नराधिपः ॥५६॥
प्रतर्दनो दिवोदासः सुदासः कोसलेश्वरः ।
ऐलो नलश्च राजर्षिर्मनुश्चैव प्रजापतिः ॥५७॥
हविर्धृश्च पृषध्रश्च प्रतीपः शान्तनुस्तथा ।
अजः प्राचीनबर्हिश्च तथेक्ष्वाकुर्महायशाः ॥५८॥
अनरण्यो नरपतिर्जानुजंघस्तथैव च ।
कक्षसेनश्च राजर्षिर्ये चान्ये चानुकीर्तिताः ॥५९॥
कल्यमुत्थाय यो नित्यं संध्ये द्वेऽस्तमयोदये ।
पठेच्छुचिरनावृत्तः स धर्मफलभाग् भवेत् ॥६०॥
देवा देवर्षयश्चैव स्तुता राजर्षयस्तथा ।
पुष्टिमायुर्यशः स्वर्गं विधास्यन्ति ममेश्वरा ॥६१॥
मा विघ्नं मा च मे पापं मा च मे परिपन्थिनः ।
ध्रुवो जयो मे नित्यः स्यात् परत्र च शुभा गतिः ॥६२॥
इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि वंशानुकीर्तनं नाम पञ्चषष्टचधिकशततमोऽध्यायः ॥१६५॥

युधिष्ठिर उवाच

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
किं जप्यं जपतो नित्यं भवेद् धर्मफलं महत् ॥१॥
प्रस्थाने वा प्रवेशे वा प्रवृत्ते वापि कर्मणि ।
दैवे वा श्राद्धकालेवा किं जप्यं कर्मसाधनम् ॥२॥
शान्तिकं पौष्ठिकं रक्षा शत्रुघ्नं भयनाशनम् ।
जप्यं यद् ब्रह्मसमितं तद् भवान् वक्तुमर्हति ॥३॥

भीष्म उवाच

व्यासप्रोक्तमिमं मन्त्रं शृणुष्वैकमना नृप ।
सावित्र्या विहितं दिव्यं सद्यः पापविमोचनम् ॥४॥
श्रुणु मन्त्रविधिं कृत्स्नं प्रोच्यमानम् मयानघ ।
यं श्रुत्वा पाण्डवश्रेष्ठ सर्वपापैः प्रमुच्यते ॥५॥
रात्रावहनि धर्मज्ञ जपन् पापैर्न लिप्यते ।
तत् तेऽहं सम्प्रवक्ष्यामि शृणुष्वैकमना नृप ॥६॥
आयुष्मान् भवते चैव यं श्रुत्वा पार्थिवात्मज ।
पुरुषस्तु सुसिद्धार्थः प्रेत्य चेह च मोदते ॥७॥
सेवितं सततं राजन् पुरा राजर्षिसत्तमैः ।
क्षत्रधर्मपरैर्नित्यं सत्यव्रतपरायणैः ॥८॥
इदमान्हिकमव्यग्रं कुर्वद्भिर्नियतैः सदा ।
नृपैर्भरतशार्दुल प्राप्यते श्रीरनुत्तमा ॥९॥

नमो वसिष्ठाय महाव्रताय
पराशरं वेदनिधिं नमस्ये ।
नमोऽस्त्वनन्ताय महोरगाय
नमोद्रस्तु सिद्धेभ्य इहाक्षयेभ्यः ॥१०॥
नमोऽस्त्वृषिभ्यः परमं परेषां
देवेषु देवं वरदं वराणाम् ।
सहस्रशीर्षाय नमः शिवाय
सहस्रनामाय जनार्दनाय ॥११॥

अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।
ऋतश्च पितृरूपश्च त्र्यम्बकश्च महेश्वरः ॥१२॥
वृषाकपिश्च शम्भुश्च हवनोऽथेश्वरस्तथा ।
एकादशैते प्रथिता रुद्रास्त्रिभुवनेश्वराः ॥१३॥
शतमेतत् समाम्नातं शतरुद्रे महात्मनाम् ।
अंशो भगश्च मित्रश्च वरुणश्च जलेश्वरः ॥१४॥
तथा धातार्यमा चैव जयन्तो भास्करस्तथा ।
त्वष्ठा पूषा तथैवेन्द्रो द्वादशो विष्णुरुच्यते ॥१५॥
इत्येते द्वादशादित्यः कास्यपेया इति श्रुति ।
धरो ध्रुवश्च सोमश्च सावित्रोऽथानिलोऽनलः ॥१६
प्रत्युषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिता ।
नासत्यश्चापि दस्रश्च स्मृतौ द्वावश्विनावपि ॥१७॥
मार्तण्डस्यात्मजावेतौ संज्ञानासाविनिर्गतौ ।
अतःपरं प्रवक्ष्यामि लोकानां कर्मसाक्षीणः ॥१८॥
अपि यज्ञस्य वेत्तारो दत्तस्य सुकृतस्य च ।
अदृश्याः सर्वभूतेषु पश्यन्ति त्रिदशेश्वराः ॥१९॥
शुभाशुभानि कर्माणि मृत्युः कालश्च सर्वशः ।
विश्वेदेवाः पितृगणा मूर्तिमन्तस्तपोधना ॥२०॥
मुनयश्चैव सिद्धश्च तपोमोक्षपरायणाः ।
शुचिश्मिताः कीर्तयतां प्रयच्छन्तिशुभं नृणाम् ॥२१
प्रजापतिकृतानेताँ ल्लोकान् दिव्येन तेजसा ।
वसन्ति सर्वलोकेषु प्रयताः सर्वकर्मसु ॥२२॥
प्राणानामीश्वरानेतान् कीर्तयन् प्रयतो नरः ।
धर्मार्थकामैर्विपुलै-र्युज्यते सह नित्यशः ॥२३॥
लोकांश्च लभते पुण्यान् विश्वेश्वरकृताञ्छुभान् ।
एते देवास्त्रयस्त्रिंशत् सर्वभूतगणेश्वराः ॥२४॥
नन्दीश्वरो महाकायो ग्रामणीर्वृषभध्वजः ।
ईश्वराः सर्वलोकानां गणेश्वरविनायकाः ॥२५॥
सौम्या रौद्रा गणाश्चैव योगभूतगणास्तथा ।

ज्योतींषि सरितो व्योम सुवर्णः पतगेश्वरः ॥२६॥
पृथिव्यां तपसा सिद्धाः स्थावराश्च चराश्च ह ।
हिमवान् गिरयः सर्वे चत्वारश्च महार्णवाः ॥२७॥
भवस्यानुचराश्चैव हरतुल्यपराक्रमाः ।
विष्णुर्देवोऽथजिष्णुश्च-स्कन्दश्चाम्बिकया सह ॥२८
कीर्तयन् प्रयतः सर्वान् सर्वपापैः प्रमुच्यते ।
अत उर्ध्वं प्रवक्ष्यामि मानवानृषिसत्तमान् ॥२९॥
यवक्रीतश्च रैभ्यश्च अर्वावसुपरावसू ।
औशिजश्चैव कक्षीवान् बलश्चाङ्गिरसः सुतः ॥३०॥
ऋषिमेधातिथे पुत्रः कण्वो बर्हिषदस्तथा ।
ब्रह्मतेजोमयाः सर्वे कीर्तिता लोकभावनाः ॥३१॥
लभन्ते हि शुभं सर्वे रुद्रानलवसुप्रभाः ।
भुवि कृत्वा शुभं कर्म मोदन्ते दिवि दैवतैः ॥३२॥
महेन्द्रगुरवः सप्त प्राचीं वै दिशमाश्रिताः ।
प्रयतः कीर्तयेदेताञ्शक्रलोके महीयते ॥३३॥
उन्मुचुः प्रमुचुश्चैव स्वस्त्यात्रेयश्च वीर्यवान् ।
दृढव्यश्चोर्ध्वबाहुश्च तृणसोमाङ्गिरास्तथा ॥३४॥
मित्रावरुणयोः पुत्रु-स्तथागस्त्यः प्रतापवान् ।
धर्मराजर्त्विजः सप्त दक्षिणां दिशमाश्रिताः ॥३५॥
दृढेयुश्च ऋतेयुश्च परिव्याधश्च कीर्तिमान् ।
एकतश्च द्वितश्चैव त्रितश्चादित्यसंनिभाः ॥३६॥
अत्रे पुत्रश्च धर्मात्मा ऋषि सारस्वतस्तथा ।
वरुणस्यर्त्विजः सप्त पश्चिमां दिशमाश्रिताः ॥३७॥
अत्रिर्वसिष्ठो भगवान् कश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ॥३८॥
ऋचीकतनयश्चोग्रो जमदग्निः प्रतापवान् ।
धनेश्वरस्य गुरवः सप्तैते उत्तराश्रिताः ॥३९॥
अपरे मुनयः सप्त दिक्षु सर्वास्वधिष्ठिताः ।
कीर्तिस्वस्तिकरा नृणां कीर्तिता लोकभावनाः ॥४०
धर्मः कामश्च कालश्च वसुर्वासुकिरेव च ।
अनन्तः कपिलश्चैव सप्तैते धरणीधराः ॥४१॥
रामो व्यासस्तथा द्रौणिरश्वत्थामा च लोमशः ।
इत्येते मुनयो दिव्या एकैकः सप्त सप्तधा ॥४२॥
शान्तिस्वस्तिकरा लोके दिशांपालाः प्रकिर्तिता ।
यस्यां यस्यां दिशि ह्येते तन्मुखः शरणं व्रजेत् ॥४३॥
स्रष्टारः सर्वभूतानां कीर्तिता लोकपावनाः ।
संवर्तो मेरुसावर्णे मार्कण्डेयश्च धार्मिकः ॥४४॥
सांख्ययोगौ नारदश्च दुर्वासाश्च महानृषिः ।
अत्यन्ततपसो दान्तास्रिषु लोकेषु विश्रुताः ॥४५॥
अपरे रुद्रसंकाशाः कीर्तिता ब्रह्मलौकिकाः ।
अपुत्रो लभते पुत्रं दरिद्रो लभते धनम् ॥४६॥
तथा धर्मार्थकामेषु सिद्धिं च लभते नरः ।
पृथुं वैन्यं नृपवरं पृथ्वी यस्याभवत् सुता ॥४७॥
प्रजापतिं सार्वभौमं कीर्तयेद् वसुधाधिपम् ।
आदित्यवंशप्रभवं महेन्द्रसमवीक्रमम् ॥४८॥
पुरुरवसमैलं च त्रिषु लोकेषु विश्रुतम् ।
बुधस्य दयितं पुत्रं कीर्तयेद् वसुधाधिपम् ॥४९॥
त्रिलोकविश्रुतं वीरं भरतं च प्रकीर्तयेत् ।
गवामयेन यज्ञेन येनेष्टं वै कृते युगे ॥५०॥
रन्तिदेवं महादेवं कीर्तयेत् परमद्युतिम् ।
विश्वजित्तपसोपेतं लक्षण्यं लोकपूजितम् ॥५१॥
तथा श्वेतं च राजर्षि कीर्तयेत् परमद्युतिम् ।
सगरस्यात्मजा येन प्लावितास्तारितास्तथा ॥५२॥
हुताशनसमानेतान् महारुपान् महौजसः ।
उग्रकायान् महासत्वान् कीर्तयेत् कीर्तिवर्धनान् ॥५३॥
देवानृषिगणांश्चैव नृपांश्च जगतीश्वरान् ।
सांख्यं योगं च परमं हव्यं कव्यं तथैव च ॥५४॥
कीर्तितं परमं ब्रह्म सर्वश्रुतिपरायणम् ।
मङ्गल्यं सर्वभूतानां पवित्रं बहुकीर्तितम् ॥५५॥
व्याधिप्रशमनं श्रेष्ठं पौष्टिकं सर्वकर्मणाम् ।
प्रयतः कीर्तयेच्चैतान् कल्यं सायं च भारत ॥५६॥
एते वै पान्ति वर्षन्ति भान्ति वान्ति सृजन्ति च ।
एते विनायकाः श्रेष्ठा दक्षाः शान्ता जितेन्द्रियाः ॥५७॥
नराणामशुभं सर्वे व्यपोहन्ति प्रकीर्तिताः ।
साक्षिभूता महात्मानः पापस्य सुकृतस्य च ॥५८॥
एतान् वै कल्यमुत्थाय कीर्तयञ्शुभमश्नुते ।
नाग्निचौरभयं तस्य न मार्गप्रतिरोधनम् ॥५९॥
एतान् कीर्तयतां नित्यं दुःस्वप्नो नश्यते नृणाम् ।
मुच्यते सर्वपापेभ्यः स्वस्तिमांश्च गृहान् व्रजेत् ॥६०॥
दीक्षाकालेषु सर्वेषु यः पठेन्नियतो द्विजः ।
न्यायवानात्मनिरतः क्षान्तो दान्तोऽनसूयकः ॥६१॥
रोगार्तो व्याधियुक्तो वा पठन् पापात् प्रमुच्यते ।
वास्तुमध्ये तु पठतः कुले स्वस्त्ययनं भवेत् ॥६२॥
क्षेत्रमध्ये तु पठतः सर्वं सस्यं प्ररोहति ।
गच्छतः क्षेममध्वानं ग्रामान्तरगतः पठन् ॥६३॥
आत्मनश्च सुतानां च दाराणां च धनस्य च ।
बीजानामोषधीनां च रक्षामेतां प्रयोजयेत् ॥६४॥
एतान् संग्रामकाले तु पठतः क्षत्रियस्य तु ।
व्रजन्ति रिपवो नाशं क्षेमं च परिवर्तते ॥६५॥
एतान् दैवे च पित्र्ये च पठतः पुरुषस्य हि ।
भुञ्जते पितरः कव्यं हव्यंच त्रिदिवौकसः ॥६६॥
न व्याधिश्वापदभयं न द्विपान्न हि तस्करात् ।
कश्मलं लघुता याति पाप्मना च प्रमुच्यते ॥६७॥
यानपात्रे च याने च प्रवासे राजवेश्मनि ।
परां सिद्धिमवाप्नोति सावित्रीं ह्युत्तमां पठन् ॥६८॥
न च राजभयं तेषां न पिशाचान्न राक्षसात् ।
नाग्न्यम्बुपवनव्यालाद् भयं तस्योपजायते ॥६९॥
चतुर्णामपि वर्णाना-माश्रमस्य विशेषतः ।
करोति सततं शान्तिं सावित्रीमुत्तमां पठन् ॥७०॥
नाग्निर्दहति काष्ठानि सावित्री यत्र पठ्यते । न
तत्र बालो म्रियते न च तिष्ठन्ति पन्नगा ॥७१॥
न तेषां विद्यते दुःखं गच्छन्ति परमां गतिम् ।
ये शृण्वन्ति महद् ब्रह्म सावित्रीगुणकीर्तनम् ॥७२॥
गवां मध्ये तु पठतो गावोऽस्य बहुवत्सलाः ।
प्रस्थाने वा प्रवासेवा सर्वावस्थां गतः पठेत् ॥७३॥
जपतां जुह्वतां चैव नित्यं च प्रयतात्मनाम् ।
ऋषीणां परमं जप्यं गुह्यमेनन्नराधिप ॥७४॥
याथातथ्येन सिद्धस्य इतिहासं पुरातनम् ।
पराशरमतं दिव्यं शक्राय कथितं पुरा ॥७५॥

तदेतत् ते समाख्यातं तथ्यं ब्रह्म सना तनम् ।
ह्रिदयं सर्वभूतानां श्रुतिरेषा सनातनी ॥७६॥
सोमादित्यान्वयाः सर्वे राघवाः कुरवस्तथा ।
पठन्ति शुचयो नित्यं सावित्रीं प्राणिनां गतिम् ॥७७॥
अभ्यासे नित्यं देवानां सप्तर्षीणां ध्रुवस्य च ।
मोक्षणं सर्वकृच्छ्राणां मोचयत्य शुभात् सदा ॥७८॥
वृद्धैः काश्यपगौतमप्रभृतिभी-
र्भृग्वङ्गिरोऽत्र्यादिभिः ।
शुक्रागस्त्यबृहस्पतिप्रभृतिभि-
र्ब्रह्मर्षिभिः सेवितम् ।
भारद्वजमतमृचीकतनयैः
प्राप्तं वसिष्ठात् पुनः ।
सावित्रीमधिगम्य शक्रवसुभिः
कृत्स्ना जिता दानवाः ॥७९॥
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे च बहुश्रुताय ॥
दिव्यांच भारत कथां कथयेच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव ॥८०॥
धर्मो विवर्धति भृगोः परिकीर्तनेन
वीर्यं विवर्धति वसिष्ठनमोनतेन ।
संग्रामजिद् भवति चैव रघुं नमस्यन्
स्यादश्विनौ च परिकीर्तयतो नरोग ॥८१॥
एषा ते कथिता राजन् सावित्री ब्रह्म शाश्वती ।
विवक्षुरसि यच्चन्यत् तत् ते वक्ष्यामि भारत ॥८२॥
इति श्रीमहाभारते अनुशासन पर्वणि दानधर्म पर्वणि सावित्रीव्रतोपाख्याने पञ्चशदधिकशततमोऽध्यायः
॥१५०॥ ७३६ । ६९६ **PDF**

दुर्गा कावच

शृणुदेवी प्रवक्ष्यामि कवचं सर्वसिद्धिदम् ।
पठित्वा पाठयित्वा च नरो मुच्येत संकटात् ॥१॥
अज्ञात्वा कवचं देवि दुर्गामन्त्रं च यो जपेत् ।
स नाप्नोति फलं तस्या परं च नरकं व्रजेत् ॥२॥
उमादेवि शिरः पातु ललाटे शुलधारिणी ।
चक्षुषी खेचरी पातु कर्णौ चत्वरवासिनी ॥३॥
सुगन्धा नासिके पातु वदनं सर्वधारिणी ।
जिव्हां च चण्डिका देवी गृवां सौभद्रिका तथा ॥४॥
असोकवासिनी चेतो द्वौ वाहु वज्रधारिणी ।
ह्रिदये ललिता देवि उदरं सिंहवाहिनी ॥५॥
कटिं भगवती देवी द्वावुरु विन्ध्यवासिनी ।
माहावला च जंघे द्वे पादौ भूतलवासिनी ॥६॥
एवं स्थिताऽसि देवि त्वं त्रैलोक्य रक्षणात्मिका ।
रक्ष माम् सर्वगात्रेषु दुर्गे देवि नमोऽस्तुते ॥७॥
इति श्रीदुर्गा तन्त्रेदुर्गा कवचं शुभम्

क्षमा प्राथना ॥

अपराधसहस्त्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥१॥
आवाहनं न जनामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षम्यतां परमेश्वरि ॥२॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरी ।
यत्पूजितं मया देवि परिपुर्णं तदस्तु मे ॥३॥
अपराधशतं कृत्वा जगदम्बेति चोच्चरेत् ।
यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः ॥४॥
सापराधोऽस्मि शरणं प्राप्तस्त्वां जगदम्बिके ।
इदानीमनुकम्प्योऽहं यथेच्छसि तथा कुरु ॥५॥
अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्युनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरी ॥६॥
कामेश्वरी जगन्माताः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरी ॥७॥
गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ॥८॥

सदाशिवस्तोत्रम्

विधिरुवाच

महादेव महादेव महादेवेतिवादिनम् ।
वत्सं गौरिव गौरिशो धावन्तमनुधावति ॥१॥
महादेव महादेव महादेवेति वादिनम् ।
नरं मुञ्चति पापानि समुद्रमिव तोयदाः ॥२॥
महादेव महादेव महादेवेत्ययं ध्वनिः ।
सुधियो मुक्तिकान्तायाः पाणिग्रहणडिण्डिमः ॥३॥
महादेव महादेव महादेवेत्ययं ध्वनिः ।
मोक्षलक्ष्मीगृहद्वार- कपाटोद्घाटनधुनि ॥४॥
महादेव महादेव महादेवेत्ययं ध्वनिः ।
उच्चैश्चपेटिकादण्डो मृत्युदैवतगण्डयोः ॥५॥
महादेव महादेव महादेवेत्ययं ध्वनिः ॥
संसारसर्पदुष्टानां दिव्यौषधममुत्तमम् ॥६॥
महादेवेति कल्याणी बाणीयस्य मुखाम्बुजे ॥
स धन्यः पावयेदन्यान् स्वदृष्टि पथगोचरान् ॥७॥
महादेव महादेव महादेवेति शब्दतः ।
प्रथमेनैव मुक्तिःस्यात् द्वाभ्यांशम्भुऋणी भवेत् ॥८॥
महादेव महादेवेत्यरण्य सञ्चरन् जनः ।
बशीकरोति ब्याघ्रादिनपि सत्यं मयोच्यते ॥९॥
महादेवेति बक्तारं दृष्ट्वैव यमकिङ्करा ।
पलायन्तये महाभिताः स्मरन्ति यमशासनम् ॥१०॥
महादेवतरुच्छाया नातिसिता न घर्मदा ।
संसारतापशमनि सा किमर्थं न सेब्यते ॥११॥
महादेवेति बाक्बल्लि चतुरक्षरपल्लबा ।
भक्तिसिक्ताफलत्येका चतुर्वर्ग फलान्यहो ॥१२॥
महादेवेति नामेदं यः शृणोति वदिष्यति ।
न तेषां नरके वासो सत्यमेव न संशयः ॥१३॥
महादेव महादेव महादेव महेस्वरः ।
मया कृतं यदज्ञानात्तत्सर्वं क्षन्तुमर्हसि ॥१४॥
महादेव महादेव महादेव महेस्वरः ।
भवानेव भवानेव भवानेव गतिर्मम ॥१५॥
महादेव महादेव महादेव त्यसौ त्रृवृत् ।
मज्जतां भबधोराब्धौ रज्जुवत्तारणी नृणाम् ॥१६॥
महादेव महादेव महादेवेत्ययं ध्वनिः ।
संसारविजदावाग्निः सत्यं सत्यं न संशयः ॥१७॥
कोटयो ब्रह्महत्याना- मगमगमकोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्तनात् ॥१८॥
इति ब्रह्माण्ड पुराणे सदाशिवस्तोत्रम् ॥ लेखक कृष्ण प्रशाद आचार्य सूर्यविनमयक भक्तपुर काठमाण्डु नेपाल् हिमाली सगरमाथा एभरेष्टपर्वत